## 6-5-3 Incremental improvements made during the preceding five years (in case of first cycle) Post

accreditation quality initiatives (second and subsequent cycles)

**गतेषु पञ्चसु वर्षेषु सम्पादिताः क्रमविकासाः (प्रथमचक्रसन्दर्भे) प्रत्यायनोत्तरं कृताः गुणवत्तोपक्रमाः (द्वितीयादिचक्रेषु)**

Answer:

उत्तरोत्तरं विकासं कामयमानः विश्वविद्यालयः विगतेषु पञ्चसु वर्षेषु यथाशक्ति स्वीये शैक्षिके प्राशासनिके च क्षेत्रे गुणाभिवर्धनाय प्रायतत। कोरोना–कारणेन अर्थात् विषमपरिस्थितेः प्रभावेण मध्ये यद्यपि अवरोधः जातः तथापि विश्वविद्यालयस्य विकासः द्रुतगत्या जायमानः वर्तते। नूतनस्य अधिनियमस्य अध्यादेशेषु प्रशासनस्य स्वरूपं कार्यप्रणाली च वर्णिता अस्ति। विश्वविद्यालयस्य शैक्षिके प्राशासनिके च कार्ये सम्प्रति आधुनिकप्रौद्योगिक्याः पूर्णशः अनुप्रयोगः जायमानः वर्तते। वैद्युतिकप्राशासनिकव्यवस्थायाः अनुप्रयोगेण सर्वाणि कार्याणि द्रुतगत्या जायमानानि सन्ति। क्रमशः यथा –

**1. विगतपञ्चवर्षेषु प्राशासनिकक्षेत्रस्य गुणाभिवर्धने कृताः सफलप्रयासाः ।**

विकासो नाम परिवर्तनम् । तच्च गतेषु पञ्चसु वर्षेषु बहुधा जातमेव । विगतपञ्चवर्षेषु प्राशासनिकसंरचनायां परिवर्तनं जातमस्ति।

**2. विगतपञ्चवर्षेषु शैक्षिकक्षेत्रस्य गुणाभिवर्धने कृताः सफलप्रयासाः ।**

शिक्षैका तु श्रुतेरङ्गं शिक्षान्या श्रुतिचोदिता इति वृद्धवचनम्। संस्कृतशिक्षायाः अर्थात् वेद–वेदाङ्ग–दर्शन–व्याकरणपुराणेतिहासादीनां पारम्परिकपाठ्यक्रमाणां सञ्चालनाय विश्वविद्यालयः सर्वदा यत्नशीलः अस्ति। अन्येऽपि गुणाभिवर्धने कृताः सफलप्रयासाः यथा –

1. विश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनकेन्द्रं सर्वदा गुणाभिवर्धनोपायान् संसूचयति। गुणाभिवर्धनस्य मानकान् च निर्धारयति। अस्य केन्द्रस्य प्रभावेण संस्कृतशिक्षणस्य सर्वेषु विभागेषु गुणाभिवर्धनं जायमानम् अस्ति। उपवेशनेषु सर्वदा पुरोगतेः विषयेषु क्रियापराः योजनाः निर्धार्यन्ते। 2019 तः 2023 पर्यन्तम् आन्तरिकगुणवत्ताश्वासनकेन्द्रस्य बहु सङ्ख्याकानि उपवेशनानिध्सभाः संवृत्ताः । एषु उपवेशनेषु विश्वविद्यालयेन संसाधितानां सफलकार्यक्रमाणां चिन्तनं सम्भवति ।

2. विगतेषु पञ्चसु वर्षेषु नूतनानां पाठ्यक्रमाणाम् अनुप्रयोगेण जातस्य गुणाभिवृद्धेः परिशीलनमपि क्रियते। यद्यपि एनं विश्वविद्यालयं विहाय अन्येऽपि संस्कृतोच्चशिक्षासंस्थाः भारते सन्ति तथापि अस्य पाठ्यक्रमाः आभारतं व्याप्ताः सन्ति। आसेतुहिमाचलं प्रसिद्धे उ0प्र0राज्य विश्वविद्यालये छात्राः शिक्षां प्राप्नुवन्ति।

3. संस्कृतशिक्षणे प्रसारे विकासे च सर्वकारस्य माध्यमसंस्थारूपेण अयं विश्वविद्यालयः स्वीयां भूमिकां वहति। छात्रेभ्यः आवासभोजनाद्याः सकलाः व्यवस्थाः सन्ति इत्यतः आवासीयविश्वविद्यालये अस्मिन् शिक्षां प्राप्तुं छात्राणां कृते क्लेशाः न भवन्ति।

4. शोधच्छात्राः संस्कृतेन एव शोधपत्राणि शोधप्रबन्धान् च लिखन्ति। विश्वविद्यालयस्य शोधपत्रिकाः ISSN संख्याया राजन्ते। सारस्वती सुषमा, प्राची, गाण्डीवम् , विश्वविद्यालय वार्ता इत्याद्याः शोधपत्रिकाः शैक्षिकगुणाभिवृद्धिं साङ्केतिकरूपेण प्रकटयन्ति।

5. शैक्षिकनवाचारेषु अपि विश्वविद्यालयः अग्रेसरः वर्तते। कोरोनाकाले अपि अविच्छिन्नरूपेण शैक्षिकगुणाभिवर्धनाय गूगल मीट, जूम, स्कैपे इत्यादीनाम् अन्तर्जालाश्रितानां माध्यमानां साहाय्येन परोक्षं शिक्षा प्रदत्ता एव । अतः शैक्षिकगुणाभिवृद्धिः अस्खलितरूपेण जायते।